"छत्राकं विड्वराहञ्च लशुनं ग्रामकुक्कुटम्।
पलाण्डुं गृञ्जनञ्चैव मत्या जग्ध्वा पतेद्द्विजः॥")
वितंसः, पुं, (वि+तंस+घञ्।) वीतंसः। मृग-पक्षिणां बन्धनोपकरणम्। इत्यमरटीकायां भरतः॥
वितण्डा, स्त्री, (वितण्ड्यते विहन्यते परपक्षो-ऽनयेति। वि+तडि+गुरोश्चेत्यः। टाप्।) स्वपक्षास्थापना परपक्षखण्डनम्। इत्यमर-भरतौ॥ (यथा, महाभारते। २।३६।३।
"एवमेतन्न चाप्येवमेवं चैतन्न चान्यथा।
प्रब्रुवर्वेदवत्तत्र वितण्डां वै परस्परम्॥")
कच्चीशाकः। शिलाकृयः। करवीरी। इति मेदिनी। डे, ३६॥ दर्वी। इति हारावली॥
विततं, त्रि, (वि+तन्+क्तः।) विस्तृतम्। (यथा, प्रबोधचन्द्रोदये। ३।५।
"उद्गायन्ति यशांसि यस्य विततैर्नादैः प्रचण्डा-निल-
प्रक्षुभ्यत्करिकुम्भकूटकुहरव्यक्तै रणक्षौ यसः॥")
वीणादिवाद्यम्। इत्यमरे ततशब्दार्थदर्शनात्॥
विततिः, स्त्री, विस्तारः। विपूर्व्वतनधातोः क्तिप्रत्ययेन निष्पन्ना। (यथा, भागवते। ८।२०।१५।
"यज्ञैर्हि सेतुमिह ते यशसो वितत्यै
गायन्ति दिग्विजयिनो यमुपेत्य भूपाः॥")
वितथं, त्रि, मिथ्या। इत्यमरः॥ (यथा, मनुः। ८।६४।
"अवाक्शिरास्तमस्यन्धे किल्बिषी नरकं व्रजेत्।
यः प्रश्नं वितथं ब्रूयात् पृष्टः सन् धर्म्मनिश्चये॥"
निष्फलः। व्यर्थः। यथा, भागवते। ८।२०।३५।
"तस्यैवं वितथे वंशे तदर्थं यजतः सुतम्।
मरुत्स्तोमेन मरुतो भरद्वाजमुपाददुः॥"
पुं, भरद्वाजपुत्त्रः। स च दौष्मन्तेर्भरतस्य पौत्त्रः। यथा, हरिवंशे। ३२।१८—१९।
"ततोऽथ वितथो नाम भरद्वाजात् सुतोऽभवत्।
पौत्त्रेऽथ वितथे जाते भरतस्तु दिवं ययौ॥
वितथञ्चाभिषिच्याथ भरद्वाजो वनं ययौ॥")
वितथ्यं, त्रि, असत्यम्। वितथशब्दात् स्वार्थे यप्रत्ययेन निष्पन्नम्॥
वितद्रुः, स्त्री, (वितनोतीति। वि+तन+"जत्वा-दयश्च।" उणा० ४।१०२। इति द्रुप्रत्ययेन साधुः।) नदीविशेषः। सा च पञ्जाबाख्यदेशे वर्त्तते। इत्युणादिकोषः॥
वितरणं, क्ली, (वि+तॄ+भावे ल्युट्।) दानम्। इत्यमरः॥ (यथाह कश्चित्।
"वित्तेन किं वितरणं यदि नास्ति तस्य॥")
वितर्कः, पुं, (वि+तर्क+घञ्।) ऊहः। (यथा, भागवते। १०।८६।१।
"सरस्वत्यास्तटे राजन् ऋषयः सत्रमासत।
वितर्कः समभूत्तेषां त्रिष्वधीशेषु को महान्॥")
संशयः। इति मेदिनी। के, १५७॥ (यथा, महाभारते। १।१६०।२३।
"यौ तौ कुमाराविव कार्त्तिकेयौ
द्वावश्विनेयाविति मे वितर्कः॥")
ज्ञानसूचकः। इति शब्दरत्नावली॥ *॥
आहो उताहो किमुत किं किम उत एते षट् विकल्पवितर्कार्थे। यथा स्थाणुराहो पुरुषः। इति आहो इत्यादि च। विकल्पे विमर्षेऽप्याहो इति रुद्रः। किम इत्यन्तं उत इत्यादि। चकारात् उताहोस्वित् आहोस्वि-दिति च यथा भारते। "उताहोस्विद्भवेदाणा नलः परपुरञ्जयः।" इति आहोस्विन्मुखमिति भारवौ। इति भरतः॥
वितर्दनं, क्ली, (वि+तर्द+ल्युट्।) वितर्कः। इति शब्दरत्नावली॥
वित(र्द्दि)र्द्दिः, स्त्री, (वि+तर्द्द हिंसायाम्+"सर्व्व-धातुभ्य इन्।" उणा० ४।११७। इति इन्।) वेदिका। इत्यमरः॥ (यथा, माघे।३।५५।
"रतान्तरे यत्र गृहान्तरेषु
वितर्द्दिनिर्यूहविटङ्कनीडः॥")
वित(र्द्दि)र्द्दिका, स्त्री, (वितर्द्दिरेव। स्वार्थे कन्।) वेदिका। इति शब्दरत्नावली। (यथा, राज-तरङ्गिण्याम्। ८।२६८५।
"क्षेमराजाभिधानेन डामरेणेन सोऽन्वितः।
शिलां वितर्द्दिकातुल्यामध्यास्त स्वप्नमध्यगाम्॥")
वितर्द्दी, स्त्री, (वितर्द्दि+कृदिकारादिति ङीष्।) वेदिका। इति शब्दरत्नावली॥
वितर्द्दी, स्त्री, वेदिका। इत्यमरटीकायां भरतः।
वितलं, क्ली, (विशेषेण तलम्।) पातालभेदः॥ यथा,—
"अतलं नितलञ्चैव वितलञ्च गभस्तिमत्।
तलं सुतलपाताले पाताला हि तु सप्त वै॥"
इति शब्दरत्नावली॥
(अस्य विवरणं यथा, देवीभागवते। ८।१९।८—१२।
"द्वितीयविवरस्यास्य वितलस्य निबोधत।
भूतलाधस्तले चैव वितले भगवान् भवः॥
हाटकेश्वरनामायं स्वपार्षदगणैर्वृतः।
प्रजापतिकृतस्यापि सर्गस्य बृंहणाय च॥
भवान्या मिथुनीभूय आस्ते देवाधिपूजितः।
भवयोर्वीर्य्यसंभूता हाटकी सरिदुत्तमा॥
समिद्धो मरुता वह्निरोजसा पिबतीव हि।
तन्निष्ठ्यूतं हाटकाख्यं सुवर्णं दैत्यवल्लभम्॥
दैत्याङ्गनाभूषणार्थं सदा सन्धारयन्ति हि॥")
वितस्तिः, पुं स्त्री, (वि+तसु उपक्षेपे+"वौ तसेः।" उणा० ४।१८१। इति तिः।) विस्तृतसकनिष्ठाङ्गुष्ठः। विगत् इति भाषा। तत्पर्य्यायः। द्वादशाङ्गुलः २। इत्यमरः॥ (यथा, मार्कण्डेये। ४९।३९।
"द्वे वितस्ती तथा हस्तो ब्राह्मतीर्थादिवेष्टनम्॥")
वितानं, क्ली, (वितन्यते यत्। वि+तन+घञ्।) वृत्तिविशेषः। इति मेदिनी। ने, १३९॥ अव-सरः। इति विश्वः॥
वितानः, पुं क्ली, (वि+तन्+घञ्।) क्रतुः। (यथा, माघे। १४।१०।
"सोमपायिनि भविष्यते मया
वाञ्छितोत्तमवितानयाजिना॥")
विस्तारः। (यथा, भागवते। ३।७।३१।
"यज्ञस्य च वितानानि योगस्य च पथः प्रभो।
नैष्कर्म्म्यस्य च साङ्ख्यस्य तन्त्रं वा भगवत्-स्मृतम्॥")
उल्लोचः। इत्यमरः॥ चाँदोया इति भाषा। अस्य पर्य्यायश्चन्द्रातपशब्दे द्रष्टव्यः॥ (यथा, रघुः। १७।२८।
"वितानसहितं तत्र भेजे पैतृकमासनम्।
चूडामणिभिरुद्घृष्टपादपीठं महीक्षिताम्॥"
समूहः। यथा, माघे। ११।४३।
"नवकनकपिशङ्गं वासराणां विधातुः
ककुभि कुलिशपाणेर्भाति भासां वितानम्॥"
शयनस्थानविशेषः। यथा, सुश्रुते। १।१८।
"तत्र कोशदामस्वस्तिकानुवेल्लितप्रतोलीमण्डल-स्थगिकायमकखट्वाचीनविबन्धवितानगोफणाः
पञ्चाङ्गी चेति चतुर्द्दशबन्धविशेषाः॥")
वितानः, त्रि, (वि+तन+घञ्।) तुच्छः। (यथा, रघुः। ६।५०।
"गगनमश्वखुरोद्धतरेणुभि-
र्नृसविता स वितानमिवाकरोत्॥")
मन्दः। इत्यमरः॥ शून्यः। इति धरणिः॥ (यथा, माघे। ३।५०।
"इहस्तुलैरप्यतुलैर्वितान-
मालापिनद्धैरपि चावितानैः॥")
वितानकः, पुं क्ली, (वितान इव। स्वार्थे कन्।) चन्द्रातपः। इति शब्दमाला॥ (यथा, कथा-सरित्सागरे। ४८।६६।
"तदा तैर्मुक्तमन्योन्यं बाणजालं बभौ दिवि।
रणलक्ष्म्या तपत्यर्के वितानकमिवाततम्॥"
समूहः। यथा, माघे। ६।२७।
"अनुययौ विविधोपलकुण्डल-
द्युतिवितानकसंवलितांशुकम्॥")
वितानकः, पुं, (वितान इव प्रतिकृतिः। वितान+कन्।) माड़इच। इति राजनिर्घण्टः॥
वितानमूलकं, क्ली, (वितानतुल्यं मूलं यस्य। बहु-व्रीहौ कन्।) उशीरम्। इति राजनिर्घण्टः॥
वितुन्नं, क्ली, (वि+तुद+क्तः।) सुनिषण्णकम्। इत्यमरः॥ शैवालकम्। इति मेदिनी। ने,१३१॥
वितुन्नकं, क्ली, (वितुन्नमिव। स्वार्थे कन्।) धान्यकम्। तुत्थम्। इत्यमरः॥
वितुन्नकः, पुं, आमलकी। इत्यमरः॥
वितुन्ना, स्त्री, भूम्यामलकी। इति राजनिर्घण्टः॥
वितुन्निका, स्त्री, (वितुन्ना+स्वार्थे कन्। टापि अत इत्वम्।) भूम्यामलकी। इति राज-निर्घण्टः॥
वित्त, त् क त्यागे। इति कविकल्पद्रुमः॥ (अदन्त-चुरा०-पर०-सक०-सेट्।) वित्तयति। वित्ता-पयति। इति दुर्गादासः॥